# निर्वाण षट्कम्

शिवॊहं शिवॊहं, शिवॊहं शिवॊहं, शिवॊहं शिवॊहं

मनॊ बुध्यहङ्कार चित्तानि नाहं
न च श्रॊत्र जिह्वा न च घ्राणनॆत्रम् ।
न च व्यॊम भूमिर्-न तॆजॊ न वायुः
चिदानन्द रूपः शिवॊहं शिवॊहम् ॥ 1 ॥

अहं प्राण सञ्ज्ञॊ न वैपञ्च वायुः
न वा सप्तधातुर्-न वा पञ्च कॊशाः ।
नवाक्पाणि पादौ न चॊपस्थ पायू
चिदानन्द रूपः शिवॊहं शिवॊहम् ॥ 2 ॥

न मॆ द्वॆषरागौ न मॆ लॊभमॊहॊ
मदॊ नैव मॆ नैव मात्सर्यभावः ।
न धर्मॊ न चार्धॊ न कामॊ न मॊक्षः
चिदानन्द रूपः शिवॊहं शिवॊहम् ॥ 3 ॥

न पुण्यं न पापं न सौख्यं न दुःखं
न मन्त्रॊ न तीर्धं न वॆदा न यज्ञः ।
अहं भॊजनं नैव भॊज्यं न भॊक्ता
चिदानन्द रूपः शिवॊहं शिवॊहम् ॥ 4 ॥

अहं निर्विकल्पॊ निराकार रूपॊ
विभूत्वाच्च सर्वत्र सर्वॆन्द्रियाणाम् ।
न वा बन्धनं नैव मुक्ति न बन्धः ।
चिदानन्द रूपः शिवॊहं शिवॊहम् ॥ 5 ॥

न मृत्युर्-न शङ्का न मॆ जाति भॆदः
पिता नैव मॆ नैव माता न जन्म ।
न बन्धुर्-न मित्रं गुरुर्नैव शिष्यः
चिदानन्द रूपः शिवॊहं शिवॊहम् ॥ 6 ॥

शिवॊहं शिवॊहं, शिवॊहं शिवॊहं, शिवॊहं शिवॊहं

Web Url: http://www.vignanam.org/veda/nirvaana-shatkam-devanagari.html